शनात्” ८। “एकनाशे द्वितीयाविनाशात्” ९। “अवयवनाशेऽप्यवयव्युपलब्धेरहेतुः” १०। “दृष्टान्तविरोधादप्रतिषेधः” ११। “इन्द्रियान्तरविकारात्” १२। “न स्मृतेः स्मर्त्तव्यविषयत्वात्” १३। “तदात्मगुणत्वसद्भावादप्रतिषेधः” १४। “अपरिसङ्ख्यानाच्च स्मृतिविषयस्य” १५। “नात्मप्रतिपत्तिहेतूनां मनसि सम्भवात्” १६। “ज्ञातुर्ज्ञानसाधनोपपत्तेः संज्ञाभेदमात्रम्” १७। “नियमश्च निरनुमानः” १८। “पूर्व्वाभ्यस्तस्मृत्यनुबन्धाज्जातस्य हर्षभयशोकसम्प्रतिपत्तेः” १९। “पद्मादिषु प्रबोधसम्मीलनविकारवत्तद्विकारः” २०। “नोष्णशीतवर्षाकालनिमित्तत्वात् पञ्चात्मकविकाराणाम्” २१। “प्रेत्याहाराभ्यासकृतात् स्तन्याभिलाषात्” २२। “अयसोऽयस्कान्ताभिगमनवत्तदुपसर्पणम्” २३। “नान्यत्र प्रवृत्त्यभावात्” २४। “वीतरागजन्मादर्शनात्” २५ सूत्राणि “एकस्यैव दर्शनस्पर्शनाभ्यामर्थस्य ग्रहणात् दर्शनस्पर्शने ज्ञानविशेषौ तृतीया च प्रकारे तेन चाक्षुषस्पर्शनोभयवत्त्वेनैकस्य धर्म्मिणः प्रतिसन्धानादित्यर्थः। तथा च योऽहं घटमद्राक्षं सोऽहं स्पृशामीत्यनुभवादात्मेन्द्रियव्यतिरिक्तएक इति १। अत्र शङ्कते चक्षुस्त्वगादीनां रूपस्पर्शादिनियतविषयत्वाच्चक्षुरादेश्चाक्षुषादिसमवायित्वमित्यत्राभेदप्रत्ययोभ्रान्त इति भावः २। समाधत्ते उक्तप्रतिषेधोन युक्तः उक्तविषयव्यवस्थानादेवात्मसद्भावादतिरिक्तात्मकल्पनादित्यर्थः। अयंभावः तत्तदिन्द्रियाणां तत्तद्विषयकप्रत्यक्षं प्रति समवायित्वं वाच्यं न तु प्रत्यक्षत्वावच्छिन्नं प्रति, अनुमित्यादिजनकत्वे तु विनिगमकाभावात्। तेन जन्यज्ञानत्वावच्छिन्नजनकतावच्छेदकमात्मत्वं चक्षुरादेरनित्यत्वादात्मनश्च नित्यतायावक्ष्यमाणत्वाच्चक्षुरादिनाशेऽपि स्मरणाच्चक्षुरहमित्याद्यप्रतीतेश्च नेन्द्रियात्मवादोयुज्यत इति ३। समाप्तमिन्द्रियप्रकरणम्। ननु गौरोऽहं जानामीत्यादिप्रतीतेरस्तु शरीरमात्मेत्याशङ्क्य दूषयति। पातकाभावात् पातकादेरभावप्रसङ्गात् तथाचोत्तरकालिकं दुःखादिकं न स्यादिति। यद्वा दाहोनाशः तथा च शरीरनाशे कृते कर्त्तरि शरीरे विनष्टे पातकं न स्यादित्यर्थः। यद्यपि भूतचैतन्यवादिना पातकादिकं नोपेयते तथापि तस्य प्रसाध्याङ्गत्वादेकदेशिनः पूर्व्वपक्षित्वाद्वा न दोष इति भावः ४। तत्रापि तुल्योदोष इत्याशङ्कते। तदभावः पातकाभावः सात्मकशरीरस्य प्रदाहेऽपि प्रसक्तः तन्नित्यत्वात् तस्य आत्मनोनित्यत्वात् नित्यत्वेन निर्विकारत्वं तेन जन्यधर्म्मानाश्रयत्वमभिमतमितिकेचित्। तन्नित्यत्वात् शरीरनाशे शरीरविशिष्टात्मनाशस्य नियतत्वादित्यपि कश्चित्। किञ्च सात्मकशरीरनाशेऽपि हन्तुः पातकाभावः स्यात् तस्यात्मनोनित्यत्वेन तन्नाशकत्वाभावात् ५। परिहरति। कार्य्याश्रयस्य चेष्टाश्रयस्य कर्त्तुः कृत्यवच्छेदकस्य शरीरस्यैव नाशः नत्वात्मन इति न पातकाभावः। यद्वा न हन्तुः पातकाभावः कार्य्याश्रयकर्त्तुर्बाधात् शरीरस्य नाशात् ब्राह्मणत्वादेः शरीरवृत्तित्वात्तन्नाशादेव पापोत्पत्तिरिति भावः। वस्तुतस्तु अपूर्व्वशरीरावच्छिन्न प्राणसंयोगात्मकोत्पत्तिवत् शरीरावच्छिन्नप्राणसंयोगध्वंसविशेषात्मकं मरणमप्यात्मनः सम्भवति अन्यथा शरीर विनाशनोद्भवनसुखनिरोधादेर्हिंसात्वं न स्यात् पातकानभ्युपगन्तृचार्व्वाकादिमते शरीरभेदसाधनन्तु वक्ष्यमाणयुक्तिभिरिति ध्येयम् ६। समाप्तदेहभेदप्रकरणम् प्रसङ्गाच्चक्षुरद्वैतप्रकरणमारभते। वामेन चक्षुषा दृष्टस्य दक्षिणेन चक्षुषा प्रत्यभिज्ञानात् स्थिरात्मसिद्धिरिति केषाञ्चिन्मतं तन्निराकरणायैतदुपन्यासः ७। एतद्दूषयति। मध्यस्थसेतुना तडागस्येव नासास्थिव्यवहितगोलकान्तरावच्छिन्नतया द्वैतप्रत्ययोभ्रम इत्यर्थः ८। आक्षिपति। चक्षुरैक्ये एकचक्षुर्नाशेऽन्धत्वं स्यादिति भावः ९। अत्रैकदेशी परिहरति। अवयवस्य शाखादेर्नाशेऽप्यवयविनोवृक्षस्य प्रत्यभिज्ञानान्नावयवनाशे सर्व्वत्रावयविनाशनियमस्तथा चैकनाशेऽपि नान्धत्वमिति १०। एकदेशिमतस्य पूर्व्वोक्ताक्षेपस्य च समाधानाय सिद्धान्तिनः सूत्रम्। उक्तप्रतिषेधोन युक्तः दृष्टान्तस्य विरोधादयुक्तत्वात् न हि शाखाच्छेदे वृक्षस्तिष्ठति तथा सति वृक्षस्यानाशप्रसङ्गादतोऽवस्थितावयवैस्तत्र खण्डवृक्षोत्पत्ते र्नैकदेशिमतं युक्तम्। एतेनैकनाशे द्वितीयाविनाशाद्भेदसाधनमपि प्रत्युक्तं चक्षुर्नाशेऽपि गोलकान्तरावच्छिन्नावयवैः खण्डचक्षुःसम्भवात् इत्यञ्च लाघवाच्चक्षुरद्वैतमिति टीकास्वरससिद्धम्। परे तु चक्षुर्द्वैतमेव सूत्रार्थं मन्यमाना व्याचक्षते सिद्धान्तिनः। सूत्रं सव्येनेति। शङ्कते नैकस्मिन्निति। समाधत्ते एकेति। शङ्कते अवयवेति। निराकरोति दृष्टान्तेति। शाखानाशे वृक्षनाशावश्यकत्वात् दृष्टान्तोन युक्तः। यद्वा दृष्टान्तस्य गोलकभेदस्य विरोधादन्यथानुपपन्नत्वाद्दृष्टं हि मृतस्य चक्षुरधिष्ठानगोलकद्वयं भेदेनैवोपलभ्यत इति वदन्ति ११। आत्मन इन्द्रियभेदे युक्त्यन्तरमाह। चिरविल्वाद्यम्लद्रव्ये दृष्टे तद्रसस्मरणाद्दन्तोदकसंप्लवरूपरसनेन्द्रियविकारादिन्द्रियव्यतिरिक्त